संस्कृतवार्ता:

दिनाङ्क :- 29.09.2025

प्रात: - 06:55

## एशिया-कप्-क्रीकेट्-परिणामः

तिलक्-वर्मायाः ऊनसप्तति धावनांकानां सहयोगेन भारतेन चिरप्रतिद्वन्द्वी पाकिस्तान्-देशं पञ्च-स्तोभैः पराजित्य, नवमवारं दुबईयाः अन्ताराष्ट्रिय-क्रीडाङ्गणे एशिया-चषक-स्पर्धा विजिता। पाकिस्तान-देशेन प्रदत्तस्य सप्तचत्वारिंशदधिकैकशत धावनांकानां लक्ष्यस्य अनुसरणे, भारतीय-दलं त्रयाणां स्तोभानां हानौ केवलं विंशति धावनांकेषु एव आसीत्। तदनन्तरं तिलक्-सञ्जु-साम्सन्-इत्येतयोः युगलेन भारतं सुस्थिरं कृतम्। इतः पूर्वं, भारतेन पणकं विजित्य क्षेत्ररक्षणं निश्चितम् आसीत्। तत्रैव क्रीडायां प्रवृत्तेन पाकिस्तान्-देशेन पञ्च कन्दुकानां शेषेषु षड्चत्वारिंशदधिकैकशत धावनाङ्काः समर्जिता। क्रीडायाम् उत्तम प्रदर्शनानन्तरं तिलक् वर्मा इत्येषः प्लेयर् आफ् द मैच् इति घोषितः।

## एशिया कपः बधाई

राष्ट्रपतिः द्रौपदीमुर्मुः वर्या दुबई-नगरे एशिया-चषक-क्रिकेट्-प्रतियोगितायां विजयानन्तरं भारतीय-दलं अभिनन्दयत् तथा च भविष्ये तस्य सुस्थिरस्य वैभवस्य कामनाम् अकरोत्। प्रधानमन्त्री नरेन्द्रमोदी एशिया-कप्-क्रीडायाः भारत-पाकिस्तान-अन्तिम-स्पर्धायाः तुलना सिन्दूराभियानेन सह अकरोत्, उक्तवान् यत् परिणामः समानः एव, भारतेन विजितम् ।

## प्रधानमन्त्री - मन की बात

प्रधानमन्त्री नरेन्द्रमोदी वोकल फॉर लोकल इति मंत्रस्य स्मरणं कुर्वन् आगामि उत्सवान् आलक्ष्य जनेभ्यः स्वदेशी उत्पादानां प्रयोगस्य आग्रहं कृतवान्। ह्यः आकाशवाण्याः मन की बात इति कार्यक्रमस्य षड्विंशत्यधिकैकशततमे संस्करणे सः अवदत् यत् आगामिषु दिनेषु बहवः उत्सवाः सन्ति। अथ च जीएसटी इति वस्तु सेवाकर -बचत-महोत्सवः अपि प्रचलति। श्री मोदी प्रोक्तवान् यत् स्वदेशीय-उत्पादानाम् क्रयणं न केवलं परिवारेषु सुखं आनयिष्यति, अपितु शिल्पीनां परिश्रमस्य अपि सम्मानं भविष्यति।

आगामिन: अक्टूबर् मासस्य द्वितीये दिनाङ्के गान्धी जयन्ती विषये प्रधानमन्त्री उक्तवान् यत् महात्मा गान्धी सर्वदा स्वदेशी खादी वस्तूनां स्वीकरणस्य विषये बोधयति स्म। सः अवदत् यत् विगत एकादशवर्षेषु देशे खादी वस्तूनां प्रति आकर्षणं बहु वर्धितम्। श्री मोदी देशवासिभ्यः आग्रहं कृतवान् यत् अक्टूबर् मासस्य द्वितीये दिने खादी वस्तूनां क्रयणम् अवश्यं कुर्वन्तु।

## गृहमन्त्री नक्सलमुक्त

केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् अद्य पूर्वोत्तरं जम्मू-कश्मीरं च विकासस्य शान्तेः च मार्गे प्रगतिं कुर्वन्तः सन्ति इति। सः नवदिल्ल्यां 'नक्सल्-मुक्तभारत- एन्डिंग रेड् टेरर् अण्डर् मोदीज् लीडरशिप्' इति राष्ट्रिय-शिखरसम्मेलनस्य समापन-सत्रं सम्बोधयन् आसीत्। श्रीशाहः अवदत् यत् सर्वकारः संवादः, सुरक्षा, समन्वयः इति त्रिषु प्रमुखस्तम्भेषु कार्यम् अकरोत्।

पीएम दिल्ली बीजेपी कार्यालय

प्रधानमन्त्री नरेन्द्र मोदी अद्य दीन दयाल उपाध्याय मार्गे नवदिल्ल्याः भाजपा कार्यालयस्य उद्घाटनम् करिष्यति। उद्घाटन-समारोहः नवरात्रि-उत्सवेन सह आचर्यते। दिल्ली-भाजपेति-दलस्य प्रमुखः विरेन्द्र-सचदेवः अवदत् यत् नूतनः कार्यालयः न केवलं कार्यस्थलं अपितु मूल्यानाम् केन्द्रम् अस्ति।